# Shiva Nakshatra Purusha Namani

# શિવનક્ષત્રપુરુષનામાનિ

## Document Information

Text title : Shivanakshatrapurushanamani

File name : shivanakShatrapuruShanAmAni.itx

Category : shiva, nAmAvalI, bhaviShyapurANa, viMshati, nakShatra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : bhaviShyamahApurANam | parva 4 (uttaraparvaH) | adhyAyaH 109 ||

Latest update : January 8, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 11, 2026

*sanskritdocuments.org*

# શિવનક્ષત્રપુરુષનામાનિ

(ભવિષ્યમહાપુરાણે કૃષ્ણયુધિષ્ઠિરસંવાદે)
શ્રીકૃષ્ણ ઉવાચ ।
શિવનક્ષત્રપુરુષં શિવભક્તિપ્રદાયકમ્ ।
યસ્મિન્નક્ષત્રયોગે તુ પુરાણજ્ઞાઃ પ્રચક્ષતે ॥ ૪॥

ફાલ્ગુનસ્યામલે પક્ષે યદા હસ્તં પ્રજાયતે ।
તદા ગ્રાહ્યં વ્રતં ચૈવ નક્તેન શિવપૂજનમ્ ॥ ૫॥

શિવાયેતિ ચ હસ્તેન પાદૌ પૂજ્યતમૌ સ્મૃતૌ ।
શઙ્કરાય નમો ગુલ્ફૌ (અઙ્ગુલ્યૌ?) પૂજ્યૌ ચિત્રાસુ પાણ્ડવ ॥ ૬॥

ભીમાયેતિ ચ સ્વાતીષુ પૂજયેત્પુરુષર્ષભ ।
ઊરુદ્વયં વિશાખાસુ ત્રિનેત્રાયેતિ પૂજયેત્ ॥ ૭॥

મેઢ્રં ચૈવાનુરાધાસુ અનઙ્ગાઙ્ગહરાય ચ ।
કટિં જ્યેષ્ઠાસુ ચ તથા સુરજ્યેષ્ઠેતિ ચાર્ચયેત ॥ ૮॥

દાનાખ્યાય નમો નાભિઃ પૂજ્યા મૂલેન શૂલિનઃ ।
પૂર્વોત્તરાષાઢયુગે(યુગ્મે) પાર્શ્વે વૈ પાર્વતીપતિઃ ॥ ૯॥

શ્રવણેન તથા કુક્ષી પૂજ્યે કપાલિનેતિ ચ ।
વક્ષઃસ્થલં ધનિષ્ઠાસુ સદ્યોજાતેતિ નામ ચ ॥ ૧૦॥

વામેતિ પૂજયેત્પાર્થ હૃદયં શતભિષાસુ ચ ।
પૂર્વોત્તરાયુગે(યુગ્મે) બાહૂ નમઃ ખટ્વાઙ્ગધારિણે ॥ ૧૧॥

પૂજ્યં રુદ્રાય ચ તથા રેવતીષુ કરદ્વયમ્ ।
નખઃ પૂજ્યાઽશ્વિનીયોગે નમઃ ખણ્ડેન્દુધારિણે ॥ ૧૨॥

ભરણીષુ તતઃ પૃષ્ઠં વૃષાઙ્કાય નમોઽસ્તુ તે ।
કૃત્તિવાસાય ચ તથા કૃત્તિકાસુ કૃકાટિકામ્ ॥ ૧૩॥

વાક્પૂજ્યા રોહિણીયોગે નમો વાચસ્પતેતિ ચ (વાચસ્પતિરિતિ) ।
મૃગોત્તમાઙ્ગે દશનાન્ભૈરવાયેતિ વૈ નમઃ ॥ ૧૪॥

આર્દ્રાસુ પૂજ્યાવધરૌ સ્થાણવેતિ યુધિષ્ઠિર ।
નાસા પુનર્વસૌ પૂજ્યા પૂષદન્તવિનાશિને ॥ ૧૫॥

પુષ્યે નેત્રત્રયં પૂજ્યં નમસ્તે સર્વદર્શિને ।
આશ્લેષાયાં લલાટં ચ ત્ર્યમ્બકાય નમો નમઃ ॥ ૧૬॥

મઘાસુ ચ જટાજૂટં પૂજયેદન્ધકારયે ।
પૂર્વાફાલ્ગુનિકાયુગ્મે શ્રવણે સોમધારિણે ॥ ૧૭॥

નમોઽસ્તુ પાશાઙ્કુશપદ્મશૂલકપાલસર્પેન્દુધનુર્ધરાય ।
ગજાસુરાનઙ્ગધુરાન્ધકાદિવિનાશમૂલાય નમઃ શિવાય ॥ ૧૮॥

- ॥ ભવિષ્યમહાપુરાણમ્ । પર્વ ૪ (ઉત્તરપર્વઃ) । અધ્યાયઃ ૧૦૯॥

- .. bhaviShyamahApurANam . parva 4 (uttaraparvaH) . adhyAyaH 109 ..

Notes:

Selected text from the Chapter 109 અધ્યાયઃ ૧૦૯ of Uttaraparva ઉત્તરપર્વ of the BhavisyaMahāPurāṇam ભવિષ્યમહાપુરાણમ્ is given on this page that highlights the mapping of ŚivaNakśatraPurusa શિવનક્ષત્રપુરુષ with respect to Names of Śiva શિવનામાનિ.

In this Chapter, Kṛsṇa કૃષ્ણ describes to Yudhiṣṭhira યુધિષ્ઠિર, the vrata વ્રત and related pūjā પૂજા that can be conducted and offered to Śiva શિવ based on Nakśatra-s નક્ષત્રાણિ (lunar mansions) commencing from Hasta Nakśatra હસ્ત નક્ષત્ર during Phālguna Māsa ફાલ્ગુન માસ, whereby the respective body parts of Śiva શિવ from Feet upwards are worshipped during the transit of Moon.

The list of the mapping is given below (in a tabular form with hyphens separating columns) for convenience of readers in the following order:
Nakśatra નક્ષત્ર - ŚivaNāma શિવનામ - Caturthī Vibhakti ચતુર્થી વિભક્તિ - BodyPart અઙ્ગ

The names of Nakśatra નક્ષત્ર used here are based on the referenced text and commence with Hasta Nakśatra હસ્ત નક્ષત્ર in alignment with the same. The numbering of Nakśatra નક્ષત્ર is taken as traditional one; viz. 1. Aśvinī ૧। અશ્વિની

The Caturthī Vibhakti ચતુર્થી વિભક્તિ (Dative case) of the respective Name નામ is usually used in Mantra-s મન્ત્રાઃ.
The detailed procedure, application and variation(s) of these should be learned from an able Guru.

Although mentioned in the text as a variation, Aṅgulyau અઙ્ગુલ્યૌ is unlikely considering the sequence of body parts indicated by the text itself.

Nakśatra - ŚivaNāma - Caturthī Vibhakti - BodyPart
નક્ષત્ર - શિવનામ - ચતુર્થી વિભક્તિ - અઙ્ગ

13. Hasta - Śiva - Śivāya - Caraṇa (Feet)
૧૩. હસ્ત - શિવ - શિવાય - ચરણ

14. Citrā - Śaṅkara - Śaṅkarāya - Gulpha (Ankles)
૧૪. ચિત્રા - શઙ્કર - શઙ્કરાય - ગુલ્ફ

15. Svāti - Bhīma - Bhīmāya - Jānu (Knees)
૧૫. સ્વાતિ - ભીમ - ભીમાય - જાનુ

16. Viśākhā - Trinetra - Trinetrāya - Ūru (Thighs)
૧૬. વિશાખા - ત્રિનેત્ર - ત્રિનેત્રાય - ઊરુ

17. Anurādhā - Anangāṅgahara - Anangāṅgaharāya - Meḍhra (Genitals)
૧૭. અનુરાધા - અનઙ્ગાઙ્ગહર - અનઙ્ગાઙ્ગહરાય - મેઢ્ર

18. Jyeṣṭhā - Surajyeṣṭha - Surajyeṣṭhāya - Kaṭi (Waist)
૧૮. જ્યેષ્ઠા - સુરજ્યેષ્ઠ - સુરજ્યેષ્ઠાય - કટિ

19. Mūla - Dānākhyā - Dānākhyāya - Nābhi (Navel)
૧૯. મૂલ - દાનાખ્ય - દાનાખ્યાય - નાભિ

20., 21. Pūrvottarāṣāḍha - Pārvatīpati - Pārvatīpataye - Pārśva (Flanks)
૨૦., ૨૧। પૂર્વોત્તરાષાઢ - પાર્વતીપતિ - પાર્વતીપતયે - પાર્શ્વ

22. Śravaṇa - Kapālin - Kapāline - Kukṣi (Belly)
૨૨. શ્રવણ - કપાલિન્ - કપાલિને - કુક્ષિ

23. Dhaniṣṭhā - Sadyojāta - Sadyojātāya - Vakṣaḥsthala (Chest)
૨૩. ધનિષ્ઠા - સદ્યોજાત - સદ્યોજાતાય - વક્ષઃસ્થલ

24. Śatabhiṣā - Vāma - Vāmāya - Hṛdaya (Heart)
૨૪. શતભિષા - વામ - વામાય - હૃદય

25., 26. Pūrvottarāyugma - Khaṭvāṅgadhārin - Khaṭvāṅgadhāriṇe - Bāhū (Both Arms)
૨૫., ૨૬. પૂર્વોત્તરાયુગ્મ - ખટ્વાઙ્ગધારિન્ - ખટ્વાઙ્ગધારિણે - બાહૂ

27. Revatī - Rudra - Rudrāya - Karadvaya (Both Hands)
૨૭. રેવતી - રુદ્ર - રુદ્રાય - કરદ્વય

1. Aśvinī - Khaṇḍendudhārin - Khaṇḍendudhāriṇe - Nakha (Nails)
૧. અશ્વિની - ખણ્ડેન્દુધારિન્ - ખણ્ડેન્દુધારિણે - નખ

2. Bharaṇī - Vṛṣāṅka - Vṛṣāṅkāya - Pṛṣṭha (Back)
૨. ભરણી - વૃષાઙ્ક - વૃષાઙ્કાય - પૃષ્ઠ

3. Kṛttikā - Kṛttivāsa - Kṛttivāsāya - Kṛkāṭikā (Back of the neck)
૩. કૃત્તિકા - કૃત્તિવાસ - કૃત્તિવાસાય - કૃકાટિકા

4. Rohiṇī - Vācaspati - Vācaspataye - Vāk ((Organ of) Speech - Tongue)
૪. રોહિણી - વાચસ્પતિ - વાચસ્પતયે - વાક્

5. Mṛgottamāṅga - Bhairava - Bhairavāya - Daśana (Teeth)
૫. મૃગોત્તમાઙ્ગ - ભૈરવ - ભૈરવાય - દશન

6. Ārdrā - Sthāṇu - Sthāṇave - Adhara (Lips)
૬. આર્દ્રા - સ્થાણુ - સ્થાણવે - અધર

7. Punarvasu - Pūṣadantavināśin - Pūṣadantavināśine - Nāsā (Nostrils)
૭. પુનર્વસુ - પૂષદન્તવિનાશિન્ - પૂષદન્તવિનાશિને - નાસા

8. Puṣya - Sarvadarśin - Sarvadarśine - Netratraya (Three Eyes)
૮. પુષ્ય - સર્વદર્શિન્ - સર્વદર્શિને - નેત્રત્રય

9. Āśleṣā - Tryambaka - Tryambakāya - Lalāṭa (Forehead)
૯. આશ્લેષા - ત્ર્યમ્બક - ત્ર્યમ્બકાય - લલાટ

10. Maghā - Andhakāri - Andhakārye - Jaṭājūṭa (Matted hair)
૧૦. મઘા - અન્ધકારિ - અન્ધકારયે - જટાજૂટ

11., 12. Pūrvāphālgunikāyugma - Somadhārin - Somadhāriṇe - Śravaṇa (Ears)
૧૧., ૧૨. પૂર્વાફાલ્ગુનિકાયુગ્મ - સોમધારિન્ - સોમધારિણે - શ્રવણ

The corresponding nAmAvalI is

૧૩. ૐ શિવાય નમઃ ।

૧૪. ૐ શઙ્કરાય નમઃ ।

૧૫. ૐ ભીમાય નમઃ ।

૧૬. ૐ ત્રિનેત્રાય નમઃ ।

૧૭. ૐ અનઙ્ગાઙ્ગહરાય નમઃ ।

૧૮. ૐ સુરજ્યેષ્ઠાય નમઃ ।

૧૯. ૐ દાનાખ્યાય નમઃ ।

૨૦. ૐ પાર્વતીપતયે નમઃ ।

૨૧. ૐ પાર્વતીપતયે નમઃ ।

૨૨. ૐ કપાલિને નમઃ ।

૨૩. ૐ સદ્યોજાતાય નમઃ ।

૨૪. ૐ વામાય નમઃ ।

૨૫. ૐ ખટ્વાઙ્ગધારિણે નમઃ ।

૨૬. ૐ ખટ્વાઙ્ગધારિણે નમઃ ।

૨૭. ૐ રુદ્રાય નમઃ ।

૧. ૐ ખણ્ડેન્દુધારિણે નમઃ ।

૨. ૐ વૃષાઙ્કાય નમઃ ।

૩. ૐ કૃત્તિવાસાય નમઃ ।

૪. ૐ વાચસ્પતયે નમઃ ।

૫. ૐ ભૈરવાય નમઃ ।

૬. ૐ સ્થાણવે નમઃ ।

૭. ૐ પૂષદન્તવિનાશિને નમઃ ।

૮. ૐ સર્વદર્શિને નમઃ ।

૯. ૐ ત્ર્યમ્બકાય નમઃ ।

૧૦. ૐ અન્ધકારયે નમઃ ।

૧૧. ૐ સોમધારિણે નમઃ ।

૧૨. ૐ સોમધારિણે નમઃ ।

Towards conclusion, the Head is worshipped with the following Śloka શ્લોક:

Namo'stu Pāśāṅkuśapadmaśūlakapālasarpendudhanurdharāya .
Gajāsurānaṅgadhurāndhakādivināśamūlāya Namaḥ Śivāya ..

નમોઽસ્તુ પાશાઙ્કુશપદ્મશૂલકપાલસર્પેન્દુધનુર્ધરાય ।
ગજાસુરાનઙ્ગધુરાન્ધકાદિવિનાશમૂલાય નમઃ શિવાય ॥

Encoded and proofread by Ruma Dewan

*Shiva Nakshatra Purusha Namani*

pdf was typeset on January 11, 2026

Please send corrections to *sanskrit@cheerful.com*